कक्षा - दसवीं (Assignment)
विषय - संस्कृत (2019-2020)

1. प्रश्न - निर्माण कुरुत -
(क) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।
(ख) तत्र राजसिंहो नाम राजपुत्रः वसति स्म।
(ग) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।
(घ) अरयः आयासजननं कर्म: व्यायामः इति कथ्यते।

2. रेखाङ्कितपदानां समासविग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -
(क) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।
(i) राजनि पुत्रः (ii) राज्ञः पुत्रः (iii) राज्ञौ पुत्रः
(ख) क्रोधो हि शत्रुः प्रथमो नराणां देहस्थितः देहस्य विनाशाय।
(i) देहनाशने (ii) देहे विनाशाय (iii) देहविनाश।
(ग) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
(i) महत् वृक्षः (ii) महान् च असौ वृक्षः (iii) महति वृक्षः
(घ) यवाक्यमपि निरापदम् आश्रमगतोऽस्मि।
(i) आपदया रहितम् (ii) आपदः रहितम् (iii) आपदि रहितम्।

3. वाक्येषु अव्ययपदानां प्रयोगात् पश्यत -
मञ्जूषा - (श्वः, शनैः - शनैः, अत्र, अद्य, सहसा)
(क) कच्छपः ____ चलति।
(ख) अहं ____ वाराणसी गमिष्यामि।
(ग) ____ निर्णयः न करणीयः।
(घ) ____ रामायणकथा आरभ्यते।
(ङ.) ____ आगच्छ।

4. संधिं कुरुत -
एकैकः, पितृगृहम्, सत्यम्, पुनरम्भसा, अत्रैव।

5. 'व्यायामः लाभाः' इति विषयमधिकृत्य पञ्चवाक्येषु लिखत।



Scanned by CamScanner

6. 'जन्तुशाला' इति विषयम् पञ्चवाक्यानि संस्कृतेन लिखत। (चित्राधारित)

7. अस्य गद्यांशस्य कृते पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत -

अमर्त्यसेनः इति नाम इव संस्कृतमयम्। अमर्त्यसेनवर्यस्य जन्मः शान्तिनिकेतने अभवत्। अस्य नाम गुरुदेवेन रवीन्द्रनाथवर्येण चितम्। अस्य नाम निर्दिशन् सः उक्तवान् आसीत् - 'अमर्त्यसेनः' इत्येषः शब्दः संस्कृतमूलः अतः एकस्य उच्चारणं स्पष्टं स्यात्, यतः अर्थपरिवर्तनं न भवेत्। शान्तिनिकेतने वसन् अमर्त्यसेनः बाल्ये संस्कृताभ्यासं कृतवान्। तस्य तीव्रः अभिलाषः अपि आसीत् यत् मातामहः क्षितीशमोहनसेन इव अहम् अपि प्रसिद्धः संस्कृत-विद्वान् भवेयम् इति।

I एकपदेन उत्तरत -

(i) अमर्त्यसेनस्य मातामहस्य नाम किम् आसीत्?

(ii) कुत्र वसन् अमर्त्यसेनः संस्कृताभ्यासं कृतवान् आसीत्?

II पूर्णवाक्येन उत्तरत -

अमर्त्यसेनस्य नामविषये निर्दिशन् रवीन्द्रनाथवर्यः किमुक्तवान्?

III भाषिक कार्यम् -

(i) 'अस्य नाम' इत्यत्र 'अस्य' इति पदं कस्मै प्रयुक्तम्?

(क) अमर्त्यसेनाय (ख) गुरुदेवाय (ग) नाथाय (घ) रवीन्द्राय।

(ii) 'स्यात्' इत्यर्थे किं क्रियापदम् अनुच्छेदे प्रयुक्तम्?

(क) वसन् (ख) भवेत् (ग) भवेयम् (घ) आसीत्

(iii) 'वार्धक्ये' इति पदस्य विलोमपदं किम्?

(क) इत्येषः (ख) अतः (ग) बाल्ये (घ) यौवने।

(iv) 'इच्छा' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(क) तीव्रः (ख) भवेयम् (ग) अहम् (घ) अभिलाषः।



Scanned by CamScanner

8. भवतः नाम गौरवः अस्ति। भवान् च छात्रावासे वसति। स्वजीवनस्य उद्देश्यं वर्णयता पितरं प्रतिलिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत।

राजकीय विद्यालयः
छात्रावासः (i) ______

पूज्य (ii) ______
सादरं प्रणामः।
अत्र कुशलं तत्रास्तु। मम (iii) ______ किं लक्षणम् अस्ति इति विषयम् अधिकृत्य अहं स्वमनोभावान् लिखामि। अहं एकः योग्यः (iv) ______ भवितुम् इच्छामि। भवान् तु जानाति यत् अस्माकं देशः (v) ______ प्रति जागरूकः नास्ति। लक्षाधिकजनाः प्रतिवर्षं (vi) ______ रोगैः ग्रस्ताः भूत्वा कालकवलिताः भवन्ति। सर्वकारैः रोगान् (vii) ______ प्रयासाः क्रियन्ते तथापि ते प्रयासाः (viii) ______ न सन्ति। अतः अहं योग्यः चिकित्सकः भूत्वा देशं सेवितुम् इच्छामि। एवं च मम जीवनस्य लक्ष्येऽपि अयम् (ix) ______ भविष्यति। विस्तरेण तु पुनः लेखिष्यामि।

(x) ______ ।

गौरवः।

मञ्जूषा - स्वास्थ्यं, पर्याप्ताः, भवदाज्ञाकारी, दिल्लीतः, पितृमहोदयः, अनेकैः, उन्मूलयितुं, जीवनस्य, एव, चिकित्सकः।

9. अधोलिखितानां पद्यान् पठित्वा प्रश्नान् संस्कृतेन उत्तरत -
शरीरायासजननं कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः॥

I एकपदेन उत्तरत -
(i) किं कर्म व्यायामसंज्ञितम् अस्ति?
(ii) शरीरयासजनं किम् भवति?
II पूर्णवाक्येन उत्तरत -
समन्ततः किं कुर्यात्?



Scanned by CamScanner

III प्रदत्तविकल्पेभ्यः शुद्धम् उत्तरं चित्वा लिखत -

(क) 'दुःखम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(i) सुखम् (ii) देहम् (iii) जननम् ।

(ख) 'तत्कृत्वा तु सुखं - - - । अत्र 'तत्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) देहाय (ii) व्यायामाय (iii) सुखाय

(ग) 'परितः' इति पदस्य पर्यायं लिखत?

(i) अभितः (ii) उभयतः (iii) समन्ततः

(घ) 'मर्दनं कुर्यात्' इत्यर्थे किं क्रियापदं प्रयुक्तम्?

(i) विमृदनीयात् (ii) मृदनीयात् (iii) कृत्वा ।



Scanned by CamScanner